# ॥ શ્રી વિષ્ણુ સહસ્રનામ સ્તોત્રમ ॥

શુક્લામ્બરધરમ વિષ્ણુમ શશિવર્ણમ ચતુર્ભુજમ ।
પ્રસન્ન વદનમ ધ્યાયેત સર્વ વિઘ્નોપશાન્તયે ॥

યસ્ય દ્વિરદ વક્ત્રાદ્યા: પારિષદ્યા: પરશ્શતમ ।
વિઘ્નમ નિઘ્નન્તિ સતતમ વિષ્વક્સેનમ તમાશ્રયે ॥

વ્યાસમ વસિષ્ઠ નપ્તારમ શક્તે: પૌત્રમ અકલ્મષમ ।
પરાશરાત્મજમ વન્દે શુખતાતમ તપોનિધિમ ॥

વ્યાસાય વિષ્ણુ રૂપાય વ્યાસ રૂપાય વિષ્ણવે ।
નમો વૈ બ્રહ્મ નિધયે વાસિષ્ઠાય નમો નમ: ॥

અવિકારાય શુદ્ધાય નિત્યાય પરમાત્મને ।
સદૈકરૂપ રૂપાય વિષ્ણવે સર્વ જિષ્ણવે ॥

યસ્ય સ્મરણ માત્રેણ જન્મ સમ્સાર બન્ધનાત ।
વિમુચ્યતે નમસ્તસ્મૈ વિષ્ણવે પ્રભ વિષ્ણવે ॥
ઓઉમ નમો વિષ્ણવે પ્રભ વિષ્ણવે ॥

---

શ્રી વૈશમ્પાયન ઉવાચ
શ્રુત્વા ધર્માનશેષેણ પાવનાનિ ચ સર્વશ: ।
યુધિષ્ઠિર: શાન્તનવમ પુનરેવાભ્ય ભાષત ॥

યુધિષ્ઠિર ઉવાચ
કિમેકમ દૈવતમ લોકે કિમ વા-પ્યેકમ પરાયણમ ।
સ્તુવન્ત: કમ કમર્ચન્ત: પ્રાપ્નુયુર માનવા: શુભમ ॥

કો ધર્મ: સર્વ ધર્માણામ ભવત: પરમો મત: ।
કિમ જપન મુચ્યતે જન્તુર જન્મ સમ્સાર બન્ધનાત ॥

શ્રી ભીષ્મ ઉવચ
જગત્પ્રભુમ દેવ દેવમ અનન્તમ પુરુષોત્તમમ ।
સ્તુવન નામ સહસ્રેણ પુરુષ: સતતોત્થિત: ॥

તમેવ ચાર્ચયન નિત્યમ ભક્ત્યા પુરુશમ અવ્યયમ ।
ધ્યાયન સ્તુવન નમસ્યમ્શ્ચ યજમાનસ તમેવ ચ ॥

અનાદિ નિધનમ વિષ્ણુમ સર્વ લોક મહેશ્વરમ ।
લોકાધ્યક્ષમ સ્તુવન નિત્યમ સર્વ દુ:ખાધિગો ભવેત ॥

બ્રહ્મણ્યમ સર્વ ધર્મજ્ઞમ લોકાનામ કીર્તિ વર્ધનમ ।
લોકનાથમ મહદ્ભૂતમ સર્વ ભૂત ભવોદ ભવમ ॥

એષ મે સર્વ ધર્માણામ ધર્મો–ધિકતમો મત: ।
યદ્ભક્ત્યા પુણ્ડરીકાક્ષમ સ્તવૈરર્ચેન નર: સદા: ॥

પરમમ યો મહત તેજ: પરમમ યો મહત તપ: ।
પરમમ યો મહદ બ્રહ્મ પરમમ ય: પરાયણમ ॥

પવિત્રાણામ પવિત્રમ યો મઙ્ગળાનામ ચ મઙ્ગળમ ।
દૈવતમ દેવતાનામ ચ ભૂતાનામ યો–વ્યય: પિતા ॥

યત: સર્વાણિ ભૂતાનિ ભવન્ત્યાદિ યુગાગમે ।
યસ્મિમ્શ્ચ પ્રલયમ યાન્તિ પુનરેવ યુગક્ષયે ॥

તસ્ય લોક પ્રધાનસ્ય જગન્નાથસ્ય ભૂપતે ।
વિષ્ણોર નામ સહસ્રમ મે શ્રુણુ પાપ ભયાપહમ ॥

યાનિ નામાનિ ગૌણાનિ વિખ્યાતાનિ મહાત્મન: ।
રિષિભિ: પરિગીતાનિ તાનિ વક્ષ્યામિ ભૂતયે ॥

રિષિર નામ્નામ સહસ્રસ્ય વેદવ્યાસો મહા મુનિ: ।
છન્દો–નુષ્ટુપ તથા દેવો ભગવાન દેવકી સુત: ॥

અમ્રુતામ શૂદ્ભવો બીજમ શક્તિર દેવકિ નન્દન: ।
ત્રિસામા હ્રુદયમ તસ્ય શાન્ત્યર્થે વિનિયુજ્યતે ॥

વિષ્ણુમ જિષ્ણુમ મહા વિષ્ણુમ પ્રભ વિષ્ણુમ મહેશ્વરમ ।
અનેક રૂપ દૈત્યાન્તમ નમામિ પુરુષોત્તમમ ॥

---

અસ્ય શ્રી વિષ્ણોર દિવ્ય સહસ્રનામ સ્તોત્ર મહા મન્ત્રસ્ય ।
શ્રી વેદવ્યાસો ભગવાન રિષિ: ।
અનુશ્ટુપ છન્દ: ।
શ્રી મહાવિષ્ણુ: પરમાત્મા શ્રીમન નારાયણો દેવતા ।
અમ્રુતામ શૂદ્ભવો ભાનુરિતિ બીજમ ।
દેવકી નન્દન: સ્રષ્ટેતિ શક્તિ: ।
ઉદ્ભવ: ક્ષોભણો દેવ ઈતિ પરમો મન્ત્ર: ।
શઙ્ખભ્રુન નન્દકી ચક્રીતિ કીલકમ ।
શાર્ઙ્ગધન્વા ગદાધર ઈત્યસ્ત્રમ ।
રથાન્ગપાણિર અક્ષોભ્ય ઈતિ નેત્રમ ।
ત્રિસામા સામગ: સામેતિ કવચમ ।
આનન્દમ પરબ્રહ્મેતિ યોનિ: ।
રુતુ: સુદર્શન: કાલ ઈતિ દિગ્બન્ધ: ।
શ્રી વિશ્વ રૂપ ઈતિ ધ્યાનમ ।
શ્રી મહાવિષ્ણુ કૈઙ્કર્ય રૂપે સહસ્રનામ જપે વિનિયોગ: ।

---

## ધ્યાનમ

ક્ષીરો ધન્વત પ્રદેશે શુચિમણિ વિલસત સૈકતે મૌક્તિકાનામ
માલા કલુપ્તા સનસ્થ: સ્ફટિકમણિ નિભૈર મૌક્તિકૈર મણ્ડિતાઙ્ગ: ।
શુભ્રૈરભ્રૈ રદભ્રૈર ઉપરિ વિરચિતૈર મુક્ત પીયૂષ વર્ષૈ:
આનન્દી ન: પુનીયાદરિનલિન ગદા શઙ્ખપાણિર મુકુન્દ: ।
ભૂ: પાદૌ યસ્ય નાભિર વિયદસુરનિલશ ચન્દ્ર સૂર્યૌ ચ નેત્રે ।
કર્ણા વાશા: શિરો દ્યૌર મુખમપિ દહનો યસ્ય વાસ્તેયમબ્ધિ: ।
અન્ત:સ્થમ યસ્ય વિશ્વમ સુર નર ખગ ગો ભોગિ ગન્ધર્વ દૈત્યૈ: ।
ચિત્રમ રમ્રમ્યતે તમ ત્રિભુવન વપુષમ વિષ્ણુમીશમ નમામિ ॥

શાન્તાકારમ ભુજગ શયનમ પદ્મનાભમ સુરેશમ
વિશ્વાધારમ ગગન સદ્રુશમ મેઘવર્ણમ શુભાઙ્ગમ ।

લક્ષ્મી કાન્તમ કમલ નયનમ યોગિહ્રુદ ધ્યાન ગમ્યમ
વન્દે વિષ્ણુમ ભવ ભય હરમ સર્વ લોકૈક નાથમ ॥

મેઘશ્યામમ પીતકોઉશેય વાસમ
શ્રીવત્સાઙ્કમ કોઉસ્તુભોદ ભાસિ તાઙ્ગમ ।
પુન્યોપેતમ પુણ્ડરીકાયતાક્ષમ
વિષ્ણુમ વન્દે સર્વ લોકૈક નાથમ ॥

સશઙ્ખ ચક્રમ સકિરીટ કુણ્ડલમ
સપીત વસ્ત્રમ સરસીરુ હેક્ષણમ ।
સહાર વક્ષ:સ્થલ શોભિ કૌસ્તુભમ
નમામિ વિષ્ણુમ શિરસા ચતુર્ભુજમ ॥

છાયાયામ પારિજાતસ્ય હેમસિમ્હાસનો પરિ ।
આસીનમમ્બુદ શ્યામમ આયતાક્ષમ અલઙ્કુતમ ॥

ચન્દ્રાનનમ ચતુર બાહુમ શ્રીવત્સાઙ્કિત વક્ષસમ ।
રુક્મિણી સત્યભામાભ્યામ સહિતમ કુશ્ણમ આશ્રયે ॥

---

ઓઉમ વિશ્વમ, વિષ્ણુર, વષટ્કારો, ભૂત ભવ્ય ભવત્પ્રભુ: ।
ભૂથ કુદ, ભૂધ બ્રુદ, ભાવો, ભૂતાત્મા, ભૂત ભાવન: ॥ 1

પૂતાત્મા, પરમાત્મા ચ, મુક્તાનામ પરમા ગતિ: ।
અવ્યય:, પુરુષ:, સાક્ષી, ક્ષેત્રજ્ઞ, અક્ષર એવ ચ ॥ 2

યોગો, યોગવિદામ નેતા, પ્રધાન પુરુષેશ્વર: ।
નારસિમ્હવપુ:, શ્રીમાન, કેશવ:, પુરુષોત્તમ: ॥ 3

સર્વ:, શર્વ:, શિવ:, સ્થાણુર, ભૂતાદિર, નિધિર અવ્યય: ।
સમ્ભવો, ભાવનો, ભર્તા, પ્રભવ:, પ્રભુર, ઈશ્વર: ॥ 4

સ્વયમ્ભૂ:, શમ્ભુર, આદિત્ય:, પુષ્કરાક્ષો, મહાસ્વન: ।
અનાદિ નિધનો, ધાતા, વિધાતા, ધાતુર ઉત્તમ: ॥ 5

અપ્રમેયો, હ્રુષીકેશ:, પદ્મનાભો, અમર પ્રભુ: ।
વિશ્વકર્મા, મનુસ, ત્વષ્ટા, સ્થવિષ્ઠ:, સ્થવિરો, ધ્રુવ: ॥ 6

અગ્રાહ્ય, શાશ્વત:, કુષ્ણો, લોહિતાક્ષ:, પ્રતર્દન: ।
પ્રભૂતસ, ત્રિકકુદ્ધામ, પવિત્રમ, મઙ્ગળમ પરમ ॥ 7

ઈશાન:, પ્રાણદ:, પ્રાણો, જ્યેષ્ઠ:, સ્રેષ્ઠ:, પ્રજાપતિ: ।
હિરણ્ય ગર્ભો, ભૂ ગર્ભો, માધવો, મધુસૂદન: ॥ 8

ઈશ્વરો, વિક્રમી, ધન્વી, મેધાવી, વિક્રમ:, ક્રમ: ।
અનુત્તમો, દુરાધર્ષ:, કુતજ્ઞ:, કુતિર, આત્મવાન ॥ 9

સુરેશ:, શરણમ, શર્મ, વિશ્વરેતા:, પ્રજા ભવ: ।
અહસ, સમ્વત્સરો, વ્યાળ:, પ્રત્યય:, સર્વ દર્શન: ॥ 10

અજસ, સર્વેશ્વર:, સિદ્ધ:, સિદ્ધિ:, સર્વાદિર, અચ્યુત: ।
વ્રુષાકપિર, અમેયાત્મા, સર્વ યોગ વિનિસ્સ્રુત: ॥ 11

વસુર, વસુમનાસ, સત્યસ, સમાત્મા, સમ્મિતસ, સમ: ।
અમોઘ:, પુણ્ડરીકાક્ષો, વ્રુષકર્મા, વ્રુષાકુતિ: ॥ 12

રુદ્રો, બહુશિરા, બભ્રુર, વિશ્વયોનિશ, શુચિશ્રવા: ।
અમ્રુતશ, શાશ્વત સ્થાણુર, વરારોહો, મહાતપા: ॥ 13

સર્વગ:, સર્વ વિદ, ભાનુર, વિષ્વક્સેનો, જનાર્દન: ।
વેદો, વેદવિદ, અવ્યઙ્ગો, વેદાઙ્ગો, વેદવિત, કવિ: ॥ 14

લોકાધ્યક્ષસ, સુરાધ્યક્ષો, ધર્માધ્યક્ષ:, કુતાકુત: ।
ચતુરાત્મા, ચતુર્વ્યૂહશ, ચતુર દમ્ષ્ટ્રશ, ચતુર્ભુજ: ॥ 15

ભ્રાજિષ્ણુર, ભોજનમ, ભોક્તા, સહિષ્ણુર, જગદાદિજ: ।
અનઘો, વિજયો, જેતા, વિશ્વ યોનિ:, પુનર્વસુ: ॥ 16

ઉપેન્દ્રો, વામન:, પ્રામ્શુર, અમોઘ:, શુચિર, ઊર્જિત: ।
અતીન્દ્રસ, સઙ્ગ્રહસ, સર્ગો, ધ્રુતાત્મા, નિયમો, યમ: ॥ 17

વેદ્યો, વૈદ્ય:, સદાયોગી, વીરહા, માધવો, મધુ: ।
અતીન્દ્રિયો, મહામાયો, મહોત્સાહો, મહાબલ: ॥ 18

મહાબુદ્ધિર, મહાવીર્યો, મહાશક્તિર, મહાદ્યુતિ: ।
અનિર્દેશ્યવપુ:, શ્રીમાન, અમેયાત્મા, મહાદ્રિધ્રુત ॥ 19

મહેષ્વાસો, મહીભર્તા, શ્રીનિવાસસ, સતામ ગતિ: ।
અનિરુદ્ધ:, સુરાનન્દો, ગોવિન્દો, ગોવિદામ પતિ: ॥ 20

મરીચિર, દમનો, હમ્સ:, સુપર્ણો, ભુજગોત્તમ: ।
હિરણ્ય નાભસ, સુતપા, પદ્મનાભ:, પ્રજાપતિ: ॥ 21

અમ્રુત્યુસ, સર્વદ્રુક, સિમ્હ:, સન્ધાતા, સન્ધિમાન, સ્થિર: ।
અજો, દુર્મર્ષનશ, શાસ્તા, વિશ્રુતાત્મા, સુરારિહા ॥ 22

ગુરૂર ગુરુતમો, ધામ, સત્યસ, સત્ય પરાક્રમ: ।
નિમિષ:, અનિમિષ:, સ્રગ્વી, વાચસ્પતિર, ઉદારધી: ॥ 23

અગ્રણીર, ગ્રામણી:, શ્રીમાન, ન્યાયો, નેતા, સમીરણ: ।
સહસ્ર મૂર્ધા, વિશ્વાત્મા, સહસ્રાક્ષ:, સહસ્રપાત: ॥ 24

આવર્તનો, નિવ્રુત્તાત્મા, સમ્વ્રુતસ, સમ્પ્રમર્દન: ।
અહસ સમ્વર્તકો, વહ્નિર, અનિલો, ધરણીધર: ॥ 25

સુપ્રસાદ:, પ્રસન્નાત્મા, વિશ્વસ્રુગ, વિશ્વભુગ વિભુ: ।
સત્કર્તા, સત્કુતસ, સાધુર, જહ્નુર, નારાયણો, નર: ॥ 26

અસઙ્ખ્યેય:, અપ્રમેયાત્મા, વિશિષ્ટશ, શિષ્ટકુચ, છુચિ: ।
સિદ્ધાર્થસ, સિદ્ધ સઙ્કલ્પ:, સિદ્ધિધસ, સિદ્ધિ સાધન: ॥ 27

વ્રુષાહી, વ્રુશભો, વિષ્ણુર, વ્રુષપર્વા, વ્રુષોદર: ।
વર્ધનો, વર્ધમાનશ ચ, વિવિક્ત:, શ્રુતિ સાગર: ॥ 28

સુભુજો, દુર્ધરો, વાગ્મી, મહેન્દ્રો, વસુદો, વસુ: ।
નૈકરૂપો, બ્રુહદ રૂપ:, શિપિવિષ્ટ:, પ્રકાશન: ॥ 29

ઓજસ તેજો દ્યુતિ ધર:, પ્રકાશાત્મા, પ્રતાપન: ।
રુદ્ધસ, સ્પષ્ટાક્ષરો, મન્ત્રસ, ચન્દ્રામ્શુર, ભાસ્કર દ્યુતિ: ॥ 30

અમ્રુતામ શૂદ્ભવો, ભાનુ:, શશબિન્દુસ, સુરેશ્વર: ।
ઔષધમ, જગતસ સેતુ:, સત્યધર્મ પરાક્રમ: ॥ 31

ભૂત ભવ્ય ભવન્નાથ:, પવન:, પાવન, અનલ: ।
કામહા, કામકૃત, કાન્ત:, કામ:, કામ પ્રદ:, પ્રભુ: ॥ 32

યુગાદિ કૃદ, યુગાવર્તો, નૈકમાયો, મહાશન: ।
અદ્રુશ્યો, વ્યકત રૂપશ ચ, સહસ્રજિત, અનન્તજિત ॥ 33

ઈષ્ટો વિશિષ્ટશ, શિષ્ટેષ્ટ:, શિખણ્ડી, નહુષો, વ્રુષ: ।
ક્રોધહા, ક્રોધકૃત, કર્તા, વિશ્વબાહુર, મહીધર: ॥ 34

અચ્યુત:, પ્રથિત:, પ્રાણ:, પ્રાણદો, વાસવાનુજ: ।
અપાન્નિધિર, અધિષ્ટાનમ, અપ્રમત્ત:, પ્રતિષ્ટિત: ॥ 35

સ્કન્દસ, સ્કન્દધરો, ધુર્યો, વરદો, વાયુવાહન: ।
વાસુદેવો, બ્રુહદ્ભાનુર, આદિદેવ:, પુરન્દર: ॥ 36

અશોકસ, તારણસ, તાર:, શૂર:, શૌરિર, જનેશ્વર: ।
અનુકૂલશ, શતા વર્ત:, પદ્મી, પદ્મ નિભેક્ષણ: ॥ 37

પદ્મ નાભો, અરવિન્દાક્ષ:, પદ્મ ગર્ભ:, શરીરભ્રુત ।
મહર્દ્ધિર, રુદ્ધો, વ્રુદ્ધાત્મા, મહાક્ષો, ગરુડ ધ્વજ: ॥ 38

અતુલ:, શરભો, ભીમ:, સમયજ્ઞો, હવિર્હરિ: ।
સર્વ લક્ષણ લક્ષણ્યો, લક્ષ્મીવાન, સમિતિઞ્જય: ॥ 39

વિક્ષરો, રોહિતો, માર્ગો, હેતુર, દામોદર:, સહ: ।
મહીધરો, મહાભાગો, વેગવાન, અમિતાશન: ॥ 40

ઉદ્ભવ:, ક્ષોબણો, દેવ:, શ્રીગર્ભ:, પરમેશ્વર: ।
કરણમ, કારણમ, કર્તા, વિકર્તા, ગહનો, ગુહ: ॥ 41

વ્યવસાયો, વ્યવસ્થાન:, સમ્સ્થાન:, સ્થાનદો, ધ્રુવ: ।
પરર્દ્ધિ:, પરમ સ્પષ્ટ:, તુષ્ટ:, પુષ્ટ:, શુભેક્ષણ: ॥ 42

રામો, વિરામો, વિરતો, માર્ગો, નેયો, નય:, અનય: ।
વીરશ, શક્તિ મતામ શ્રેષ્ઠો, ધર્મો, ધર્મ વિદુત્તમ: ॥ 43

વૈકુણ્ઠઃ, પુરુષઃ, પ્રાણઃ, પ્રાણદઃ, પ્રણવઃ, પ્રુથુઃ ।
હિરણ્ય ગર્ભશ, શત્રુઘ્નો, વ્યાપ્તો, વાયુર, અધોક્ષજઃ ॥ 44

રુતુસ, સુદર્શનઃ, કાલઃ, પરમેષ્ઠી, પરિગ્રહઃ ।
ઉગ્રસ, સમ્વત્સરો, દક્ષો, વિશ્રામો, વિશ્વદક્ષિણઃ ॥ 45

વિસ્તારઃ, સ્થાવરસ થાણુઃ, પ્રમાણમ, બીજમ અવ્યયમ ।
અર્થઃ, અનર્થઃ, મહાકોશો, મહાભોગો, મહાધનઃ ॥ 46

અનિર્વિણ્ણઃ, સ્થવિષ્ઠો, ભૂર, ધર્મયૂપો, મહામખઃ ।
નક્ષત્ર નેમિર, નક્ષત્રી, ક્ષમઃ, ક્ષામસ, સમીહનઃ ॥ 47

યજ્ઞ, ઈજ્યો, મહેજ્યશ ચ, ક્રતુસ, સત્રમ, સતાઙ્ગતિઃ ।
સર્વ દર્શી, નિવ્રુત્તાત્મા, સર્વજ્ઞો, જ્ઞાનમ ઉત્તમમ ॥ 48

સુવ્રતઃ, સુમુખસ, સૂક્ષ્મઃ, સુઘોષઃ, સુખદઃ, સુહ્રુત ।
મનોહરો, જિતક્રોધો, વીરબાહુર, વિદારણઃ ॥ 49

સ્વાપનસ, સ્વવશો, વ્યાપી, નૈકાત્મા, નૈક કર્મ ક્રુત ।
વત્સરો, વત્સલો, વત્સી, રત્નગર્ભો, ધનેશ્વરઃ ॥ 50

ધર્મગુબ, ધર્મક્રુદ, ધર્મી, સદક્ષરમ, અસત્ક્ષરમ ।
અવિજ્ઞાતા, સહસ્રામ્શુર, વિધાતા, ક્રુત લક્ષણઃ ॥ 51

ગભસ્તિ નેમિસ, સત્ત્વસ્થસ, સિમ્હો, ભૂત મહેશ્વરઃ ।
આદિદેવો, મહાદેવો, દેવેશો, દેવભ્રુદ, ગુરુઃ ॥ 52

ઉત્તરો, ગોપતિર, ગોપ્તા, જ્ઞાનગમ્યઃ, પુરાતનઃ ।
શરીર ભૂત ભ્રુદ, ભોક્તા, કપીન્દ્રો, ભૂરિદક્ષિણઃ ॥ 53

સોમપઃ, અમ્રુતપઃ, સોમઃ, પુરુજિત, પુરુસત્તમઃ ।
વિનયો, જયઃ, સત્ય સન્ધો, દાશાર્હઃ, સાત્વતામ પતિઃ ॥ 54

જીવો, વિનયિતા, સાક્ષી, મુકુન્દઃ, અમિત વિક્રમઃ ।
અમ્ભોનિધિર, અનન્તાત્મા, મહોદધિશય, અન્તકઃ ॥ 55

અજો, મહાર્હ:, સ્વાભાવ્યો, જિતામિત્ર:, પ્રમોદન: ।
આનન્દો, નન્દનો, નન્દ:, સત્ય ધર્મા, ત્રિવિક્રમ: ॥ 56

મહર્ષિ:, કપિલાચાર્ય:, કૃતજ્ઞો, મેદિની પતિ: ।
ત્રિપદસ, ત્રિદ શાધ્યક્ષો, મહાશ્રુઙ્ગ:, કૃતાન્ત કૃત ॥ 57

મહાવરાહો, ગોવિન્દ:, સુષેણ:, કનકાઙ્ગદી ।
ગુહ્યો, ગભીરો, ગહનો, ગુપ્તશ, ચક્ર ગદા ધર: ॥ 58

વેધા:, સ્વાઙ્ગ:, અજિત:, કૃષ્ણો, દ્રુઢ:, સઙ્કર્ષણ, અચ્યુત: ।
વરુણો, વારુણો, વ્રુક્ષ:, પુષ્કરાક્ષો, મહામના: ॥ 59

ભગવાન, ભગહા, નન્દી, વનમાલી, હલાયુધ: ।
આદિત્યો, જ્યોતિર આદિત્ય:, સહિષ્ણુર, ગતિસત્તમ: ॥ 60

સુધન્વા, ખણ્ડ પરશુર, દારુણો, દ્રવિણ પ્રદ: ।
દિવસ્પ્રુક, સર્વદ્રુગ, વ્યાસો, વાચસ્પતિર, અયોનિજ: ॥ 61

ત્રિસામા, સામગ:, સામ, નિર્વાણમ, ભેષજમ, ભિષક ।
સન્યાસ કૃચ, છમ:, શાન્તો, નિષ્ઠા, શાન્તિ:, પરાયણમ ॥ 62

શુભાઙ્ગ:, શાન્તિદ:, સ્રષ્ટા, કુમુદ:, કુવલેશય: ।
ગોહિતો, ગોપતિર, ગોપ્તા, વ્રુષભાક્ષો, વ્રુષપ્રિય: ॥ 63

અનિવર્તી, નિવ્રુત્તાત્મા, સઙ્ક્ષેપ્તા, ક્ષેમકૃચ, છિવ: ।
શ્રીવત્સ વક્ષા:, શ્રીવાસ:, શ્રીપતિ:, શ્રીમતામ વર: ॥ 64

શ્રીદ:, શ્રીશ:, શ્રીનિવાસ:, શ્રીનિધિ:, સ્રીવિભાવન: ।
શ્રીધર:, શ્રીકર:, શ્રેય: શ્રીમાન, લોક ત્રયાશ્રય: ॥ 65

સ્વક્ષ:, સ્વઙ્ગ:, શતાનન્દો, નન્દિર, જ્યોતિર ગણેશ્વર: ।
વિજિતાત્મા, વિધેયાત્મા, સત્કીર્તિશ, છિન્ન સમ્શય: ॥ 66

ઉદીર્ણ:, સર્વતશ ચક્ષુર, અનીશ:, શાશ્વત સ્થિર: ।
ભૂશયો, ભૂષણો, ભૂતિર, અશોક:, શોક નાશન: ॥ 67

અર્ચિષ્માન, અર્ચિત:, કુમ્ભો, વિશુદ્ધાત્મા, વિશોધન: ।
અનિરુદ્ધ:, અપ્રતિરથ:, પ્રદ્યુમ્ન:, અમિત વિક્રમ: ॥ 68

કાલનેમિ નિહા, શૌરિ:, શૂર:, શૂર જનેશ્વર: ।
ત્રિલોકાત્મા, ત્રિલોકેશ:, કેશવ:, કેશિહા, હરિ: ॥ 69

કામદેવ:, કમપાલ:, કામી, કાન્ત:, કૃતાગમ: ।
અનિર્દેશ્યવપુર, વિષ્ણુ:, વીર:, અનન્તો, ધનઞ્જય: ॥ 70

બ્રહ્મણ્યો, બ્રહ્મકૃદ બ્રહ્મા, બ્રહ્મ, બ્રહ્મ વિવર્ધન: ।
બ્રહ્મવિદ, બ્રાહ્મણો, બ્રહ્મી, બ્રહ્મજ્ઞો, બ્રાહ્મણ પ્રિય: ॥ 71

મહાક્રમો, મહા કર્મા, મહાતેજા, મહોરગ: ।
મહાક્રતુર, મહાયજ્વા, મહાયજ્ઞો, મહાહવિ: ॥ 72

સ્તવ્ય:, સ્તવ પ્રિય:, સ્તોત્રમ, સ્તુત:, સ્તોતા, રણપ્રિય: ।
પૂર્ણ:, પૂરયિતા, પુણ્ય:, પુણ્ય કીર્તિર, અનામય: ॥ 73

મનોજવસ, તીર્થકરો, વસુરેતા, વસુપ્રદ: ।
વસુપ્રદો, વાસુદેવો, વસુર, વસુમના, હવિ: ॥ 74

સદ્ગતિ:, સત્કૃતિ:, સત્તા, સદ્ભૂતિ:, સત્પરાયણ: ।
સૂરસેનો, યદુ શ્રેષ્ઠ:, સન્નિવાસ:, સુયામુન: ॥ 75

ભૂતાવાસો, વાસુદેવ:, સર્વાસુ નિલય, અનલ: ।
દર્પહા, દર્પદો, અદ્રુપ્તો, દુર્ધરોથ, અપરાજિત: ॥ 76

વિશ્વ મૂર્તિર, મહા મૂર્તિર, દીપ્ત મૂર્તિર, અમૂર્તિમાન ।
અનેક મૂર્તિર, અવ્યક્ત:, શત મૂર્તિ:, શતાનન: ॥ 77

એકો, નૈક:, સ, વ:, ક:, કિમ, યત, તત, પદમ અનુત્તમમ ।
લોક બન્ધુર, લોક નાથો, માધવો, ભક્ત વત્સલ: ॥ 78

સુવર્ણ વર્ણો, હેમાઙ્ગો, વરાઙ્ગશ, ચન્દનાઙ્ગદી ।
વીરહા, વિષમ:, શૂન્યો, ઘ્રુથાશીર, અચલ:, ચલ: ॥ 79

અમાની, માનદો, માન્યો, લોક સ્વામી, ત્રિ લોક ધ્રુત ।
સુમેધા, મેધજો, ધન્યઃ, સત્યમેધા, ધરાધરઃ ॥ 80

તેજો વ્રુષો, દ્યુતિ ધરઃ, સર્વ શસ્ત્ર ભ્રુતામ વરઃ ।
પ્રગ્રહો, નિગ્રહો, વ્યગ્રો, નૈકશ્રુઙ્ગો, ગદાગ્રજઃ ॥ 81

ચતુર મૂર્તિઃ, ચતુર બાહુઃ, ચતુર વ્યૂહઃ, ચતુર ગતિઃ ।
ચતુર આત્મા, ચતુર ભાવઃ, ચતુર વેદવિદ, એકપાત ॥ 82

સમાવર્તો, નિવ્રુત્તાત્મા, દુર્જયો, દુરતિક્રમઃ ।
દુર્લભો, દુર્ગમો, દુર્ગો, દુરાવાસો, દુરારિહા ॥ 83

શુભાઙ્ગો, લોક સારઙ્ગઃ, સુતન્તુસ, તન્તુ વર્ધનઃ ।
ઈન્દ્ર કર્મા, મહા કર્મા, ક્રુત કર્મા, ક્રુતાગમઃ ॥ 84

ઉદ્ભવઃ, સુન્દરઃ, સુન્દો, રત્ન નાભઃ, સુલોચનઃ ।
અર્કો, વાજસનિઃ, શ્રુઙ્ગી, જયન્તઃ, સર્વ વિજ્જયી ॥ 85

સુવર્ણ બિન્દુર, અક્ષોભ્યઃ, સર્વવાગ ઈશ્વરેશ્વરઃ ।
મહા હ્રુદો, મહા ગર્તો, મહા ભૂતો, મહા નિધિઃ ॥ 86

કુમુદઃ, કુન્દરઃ, કુન્દઃ, પર્જન્યઃ, પાવનઃ, અનિલઃ ।
અમ્રુતાશઃ, અમ્રુત વપુઃ, સર્વજ્ઞઃ, સર્વતો મુખઃ ॥ 87

સુલભઃ, સુવ્રતઃ, સિદ્ધઃ, શત્રુજિત છત્રુતાપનઃ ।
ન્યગ્રોધ ઉદુમ્બરઃ, અશ્વત્થઃ, ચાણૂરાન્ધ્ર નિષૂદનઃ ॥ 88

સહસ્રાર્ચિઃ, સપ્ત જિહ્વઃ, સપ્તૈધાઃ, સપ્ત વાહનઃ ।
અમૂર્તિર, અનઘઃ, અચિન્ત્યો, ભય ક્રુદ, ભય નાશનઃ ॥ 89

અણુર, બ્રુહત, ક્રુશઃ, સ્થૂલો, ગુનભ્રુન, નિર્ગુણો, મહાન ।
અધ્રુતઃ, સ્વધ્રુતઃ, સ્વાસ્યઃ, પ્રાગ વમ્શો, વમ્શ વર્ધનઃ ॥ 90

ભારભ્રુત, કથિતો, યોગી, યોગીશઃ, સર્વ કામદઃ ।
આશ્રમઃ, શ્રમણ, ક્ષામઃ, સુપર્ણો, વાયુવાહનઃ ॥ 91

ધનુર ધરો, ધનુર વેદો, દણ્ડો, દમયિતા, અદમઃ ।
અપરાજિતઃ, સર્વસહો, નિયન્તા, નિયમો, યમઃ ॥ 92

સત્ત્વવાન, સાત્ત્વિકઃ, સત્યઃ, સત્ય ધર્મ પરાયણઃ ।
અભિપ્રાયઃ, પ્રિયાર્હ, અર્હઃ, પ્રિય કૃત, પ્રીતિ વર્ધનઃ ॥ 93

વિહાય સગતિર, જ્યોતિઃ, સુરુચિર, હુતભુગ વિભુઃ ।
રવિર, વિરોચનઃ, સૂર્યઃ, સવિતા, રવિ લોચનઃ ॥ 94

અનન્ત હુતભુગ ભોક્તા, સુખદો, નૈકદ, અગ્રજઃ ।
અનિર્વિણ્ણઃ, સદામર્ષી, લોકાધિષ્ઠાનમ, અદ્ભુતઃ ॥ 95

સનાત, સનાતન તમઃ, કપિલઃ, કપિરવ્યયઃ ।
સ્વસ્તિદઃ, સ્વસ્તિ કૃત, સ્વસ્તિ, સ્વસ્તિ ભુક, સ્વસ્તિ દક્ષિણઃ ॥ 96

અરૌદ્રઃ, કુણ્ડલી, ચક્રી, વિક્રમી, ઊર્જિત શાસનઃ ।
શબ્દાતિગઃ, શબ્દ સહઃ, શિશિરઃ, શર્વરીકરઃ ॥ 97

અક્રૂરઃ, પેશલો, દક્ષો, દક્ષિણઃ, ક્ષમિણામ વરઃ ।
વિદ્વત્તમો, વીત ભયઃ, પુણ્ય શ્રવણ કીર્તનઃ ॥ 98

ઉત્તારણો, દુષ કૃતિહા, પુણ્યો, દુઃ સ્વપ્ન નાશનઃ ।
વીરહા, રક્ષણઃ, સન્તો, જીવનઃ, પર્યવસ્થિતઃ ॥ 99

અનન્ત રૂપઃ, અનન્ત શ્રીર, જિત મન્યુર, ભયાપહઃ ।
ચતુરશ્રો, ગભીરાત્મા, વિદિશો, વ્યાદિશો, દિશઃ ॥ 100

અનાદિર, ભૂર્ભુવો, લક્ષ્મીઃ, સુવીરો, રુચિરાઙ્ગદઃ ।
જનનો, જન જન્માદિર, ભીમો, ભીમ પરાક્રમઃ ॥ 101

આધાર નિલયો, ધાતા, પુશ્પહાસઃ, પ્રજાગરઃ ।
ઊર્ધ્વગઃ, સત્પથાચારઃ, પ્રાણદઃ, પ્રણવઃ, પણઃ ॥ 102

પ્રમાણમ, પ્રાણ નિલયઃ, પ્રાણધ્રુત, પ્રાણ જીવનઃ ।
તત્ત્વમ, તત્ત્વ વિદ, એકાત્મા, જન્મ મ્રુત્યુ જરાતિગઃ ॥ 103

ભૂર ભુવ: સ્વસ્તરુસ, તાર:, સવિતા, પ્રપિતામહ: ।
યજ્ઞો, યજ્ઞ પતિર, યજ્વા, યજ્ઞાઙ્ગો, યજ્ઞ વાહન: ॥ 104

યજ્ઞ ભ્રુદ, યજ્ઞ ક્રુદ, યજ્ઞી, યજ્ઞ ભુગ, યજ્ઞ સાધન: ।
યજ્ઞાન્ત ક્રુદ, યજ્ઞ ગુહ્યમ, અન્નમ, અન્નાદ એવ ચ ॥ 105

આત્મયોનિ:, સ્વયમ જાતો, વૈખાન:, સામ ગાયન: ।
દેવકી નન્દન:, સ્રષ્ટા, ક્ષિતીશ:, પાપ નાશન: ॥ 106

શઙ્ખ ભ્રુન, નન્દકી, ચક્રી, શાર્ઙ્ગ ધન્વા, ગદા ધર: ।
રથાઙ્ગપાણિર, અક્ષોભ્ય:, સર્વ પ્રહરણાયુધ: । 107
સર્વ પ્રહરણાયુધ ઓઉમ નમ ઈથિ ॥

** વનમાલી ગદી શાર્ઙ્ગી શઙ્ખી ચક્રી ચ નન્દકી ।
શ્રીમાન નારાયણો વિષ્ણુર વાસુદેવો–ભિરક્ષતુ । 108
શ્રી વાસુદેવો–ભિરક્ષતુ ઓઉમ નમ ઈતિ ॥

---

## ફલ શ્રુતિ

ઈતીદમ કીર્તનીયસ્ય કેશવસ્ય મહાત્મન: ।
નામ્નામ સહસ્રમ દિવ્યાનામ અશેષેણ પ્રકીર્તિતમ ॥ 1

ય ઈદમ શ્રુણુયાન નિત્યમ યશ્ચાપિ પરિકીર્તયેત ।
નાશુભમ પ્રાપ્નુયાત કિઞ્ચિત સો–મુત્રેહ ચ માનવ: ॥ 2

વેદાન્તગો બ્રાહ્મણ: સ્યાત ક્ષત્રિયો વિજયી ભવેત ।
વૈશ્યો ધન સમ્રુદ્ધ: સ્યાત છૂદ્ર: સુખમવાપ્નુયાત ॥ 3

ધર્માર્થી પ્રાપ્નુયાદ ધર્મમ અર્થાર્થી ચાર્થમાપ્નુયાત ।
કામાનવાપ્નુયાત કામી પ્રજાર્થી ચાપ્નુયાત પ્રજા: ॥ 4

ભક્તિમાન ય: સદોત્થાય શુચિસ તદ્ગત માનસ: ।
સહસ્રમ વાસુદેવસ્ય નામ્નામ એતત પ્રકીર્તયેત ॥ 5

યશ: પ્રાપ્નોતિ વિપુલમ જ્ઞાતિ પ્રાધાન્યમ એવ ચ ।
અચલામ શ્રિયમાપ્નોતિ શ્રેય: પ્રાપ્નોતિ અનુત્તમમ ॥ 6

ન ભયમ ક્વચિદાપ્નોતિ વીર્યમ તેજશ્ચ વિન્દતિ ।
ભવત્યરોગો ધ્યુતિમાન બલરૂપ ગુણાન્વિત: ॥ 7

રોગાર્તો મુચ્યતે રોગાદ બદ્ધો મુચ્યેત બન્ધનાત ।
ભયાન મુચ્યેત ભીતસ્તુ મુચ્યેતાપન્ન આપદ: ॥ 8

દુર્ગાણ યતિતરત્યાશુ પુરુષ: પુરુષોત્તમમ ।
સ્તુવન નામ સહસ્રેણ નિત્યમ ભક્તિ સમન્વિત: ॥ 9

વાસુદેવાશ્રયો મર્ત્યો વાસુદેવ પરાયણ: ।
સર્વ પાપ વિશુદ્ધાત્મા યાતિ બ્રહ્મ સનાતનમ ॥ 10

ન વાસુદેવ ભક્તાનામ અશુભમ વિદ્યતે ક્વચિત ।
જન્મ મ્રુત્યુ જરા વ્યાધિ ભયમ નૈવો પજાયતે ॥ 11

ઈમમ સ્તવમધીયાન: સ્રદ્ધા ભક્તિ સમન્વિત: ।
યુજ્યેતાત્મ સુખ ક્ષાન્તિ શ્રી ધ્રુતિ સ્મ્રુતિ કીર્તિભિ: ॥ 12

ન ક્રોધો ન ચ માત્સર્યમ ન લોભો નાશુભા મતિ: ।
ભવન્તિ કૃતપુણ્યાનામ ભક્તાનામ પુરુષોત્તમે ॥ 13

ધૌ: સચન્દ્રાર્ક નક્ષત્રા ખમ દિશો ભૂર મહોદધિ: ।
વાસુદેવસ્ય વીર્યેણ વિધ્રુતાનિ મહાત્મના: ॥ 14

સસુરાસુર ગન્ધર્વમ સયક્ષોરગ રાક્ષસમ ।
જગત વશે વર્તતેદમ કૃષ્ણસ્ય સચરાચરમ ॥ 15

ઈન્દ્રિયાણિ મનો બુદ્ધિ: સત્ત્વમ તેજો બલમ ધ્રુતિ: ।
વાસુદેવાત્મકાન્યાહુ: ક્ષેત્રમ ક્ષેત્રજ્ઞ એવ ચ ॥ 16

સર્વાગમાનામ આચાર: પ્રથમમ પરિ કલ્પિત: ।
આચાર પ્રથમો ધર્મો ધર્મસ્ય પ્રભુર અચ્યુત: ॥ 17

રિષય: પિતરો દેવા મહાભૂતાનિ ધાતવ: ।
જઙ્ગમા જઙ્ગમમ ચેદમ જગન નારાયણોદ ભવમ ॥ 18

યોગો જ્ઞાનમ તથા સાઙ્ખ્યમ વિદ્યા: શિલ્પાદિ કર્મ ચ ।
વેદા: શાસ્ત્રાણિ વિજ્ઞાનમ એતત સર્વમ જનાર્દનાત ॥ 19

એકો વિષ્ણુર મહદ્ભૂતમ પ્રુથગ ભૂતાન્ય નેકશ: ।
ત્રીન લોકાન વ્યાપ્ય ભૂતાત્મા ભુઙ્કતે વિશ્વભુગવ્યયઃ ॥ 20

ઈમમ સ્તવમ ભગવતો વિષ્ણોર વ્યાસેન કીર્તિતમ ।
પઠેદ્ય ઈચ્છેત પુરુષ: શ્રેય: પ્રાપ્તુમ સુખાનિ ચ ॥ 21

વિશ્વેશ્વરમજમ દેવમ જગત: પ્રભુમ અવ્યયમ ।
ભજન્તિ યે પુષ્કરાક્ષમ ન તે યાન્તિ પરાભવમ । 22
ન તે યાન્તિ પરાભવ ઓઉમ નમ ઈતિ ॥

---

અર્જુન ઉવાચ
પદ્મ પત્ર વિશાલાક્ષ પદ્મ નાભ સુરોત્તમ ।
ભકતાનામ અનુરકતાનામ ત્રાતા ભવ જનાર્દન ॥

શ્રી ભગવાન ઉવાચ
યો મામ નામ સહસ્રેણ સ્તોતુમ ઈચ્છતિ પાણ્ડવ ।
સોહ–મેકેન શ્લોકેન સ્તુત એવ ન સમ્શય: ।
સ્તુત એવ ન સમ્શય ઓઉમ નમ ઈતિ ॥

વ્યાસ ઉવાચ
વાસનાદ્દ વાસુદેવસ્ય વાસિતમ ભુવન ત્રયમ ।
સર્વભૂત નિવાસો–સિ વાસુદેવ નમો–સ્તુ તે ।
શ્રી વાસુદેવ નમો–સ્તુત ઓઉમ નમ ઈતિ ॥

પાર્વત્યુવાચ
કેનોપાયેન લઘુના વિષ્ણોર નામ સહસ્રકમ ।
પઠ્યતે પણ્ડિતૈર નિત્યમ શ્રોતુમ ઈચ્છામ્યહમ પ્રભો ॥

ઈશ્વર ઉવાચ
** શ્રી રામ રામ રામેતિ રમે રામે મનોરમે ।
સહસ્રનામ તત્તુલ્યમ રામ નામ વરાનને ।
શ્રી રામ નામ વરાનન ઓઉમ નમ ઈતિ ॥

બ્રહ્મોવાચ
નમો–સ્ત્વનન્તાય સહસ્ર મૂર્તયે સહસ્રપાદાક્ષિ શિરોરુ બાહવે ।
સહસ્ર નામ્ને પુરુષાય શાશ્વતે સહસ્ર કોટી યુગધારિણે નમ: ।
સહસ્રકોટી યુગ ધરિણ ઓઉમ નમ ઈતિ ॥

સઞ્જય ઉવાચ
યત્ર યોગેશ્વર: કૃષ્ણો યત્ર પાર્થો ધનુર્ધર: ।
તત્ર શ્રીર વિજયો ભૂતિર ધ્રુવા નીતિર મતિર મમ ॥

શ્રી ભગવાન ઉવાચ
અનન્યાશ્ચિન્તયન્તો મામ યે જના: પર્યુપાસતે ।
તેષામ નિત્યાભિયુક્તાનામ યોગ ક્ષેમમ વહામ્યહમ ॥

પરિત્રાણાય સાધૂનામ વિનાશાય ચ દુષ્કૃતામ ।
ધર્મ સમ્સ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥

આર્તા વિષણ્ણા: શિથિલાશ્ચ ભીતા:
ઘોરેષુ ચ વ્યાધિષુ વર્તમાના: ।
સઙ્કીર્ત્ય નારાયણ શબ્દ માત્રમ
વિમુક્ત દુ:ખા: સુખિનો ભવન્તિ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યા––ત્મના વા પ્રકૃતે: સ્વભાવાત ।
કરોમિ યદ્યત સકલમ પરસ્મૈ
નારાયણાયેતિ સમર્પયામિ ॥
શ્રીમન નારાયણાયેતિ સમર્પયામિ ॥

**શ્રી વિષ્ણુ સહસ્રનામ સ્તોત્રમ સમ્પૂર્ણમ**